# Mahendrakritam Surabhi Stotram

# महेन्द्रकृतं सुरभीस्तोत्रम्

## Document Information

Text title : Mahendrakritam Surabhi Stotram

File name : mahendrakRRitaMsurabhIstotram.itx

Category : devii, devI, brahmavaivartapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | prakRRitikhaNDa | adhyAya 47/17-19, 24-27||

Latest update : March 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 5, 2025

*sanskritdocuments.org*

# महेन्द्रकृतं सुरभीस्तोत्रम्

नारायण उवाच ।
ॐ सुरभ्यै नम इति मन्त्रोऽयं तु षडक्षरः ।
सिद्धो लक्षजपेनैव भक्तानां कल्पपादपः ॥ १६॥

स्थितं ध्यानं यजुर्वेदे पूजनं सर्वसम्मतम् ।
ऋद्धिदां वृद्धिदां चैव मुक्तिदो सर्वकामदाम् ॥ १७॥

लक्ष्मीस्वरूपां परमां राधासहचरीं पराम् ।
गवामधिष्ठातृदेवीं गवामाद्यां गवां प्रसूम् ॥ १८॥

पवित्ररूपां पूज्यां च भक्तानां सर्वकामदाम् ।
यया पूतं सर्वविश्वं तां देवीं सुरभीं भजे ॥ १९॥

घटे वा धेनुशिरसि बद्धस्तम्भे गवां च वा ।
शालग्रामे जलेऽग्नौ वा सुरभी पूजयेद्विजः ॥ २०॥

दीपान्विता परदिने पूर्वाह्ने भक्तिसंयुतः ।
यः पूजयेच्च सुरभीं स च पूज्यो भवेद्भुवि ॥ २१॥

महेन्द्र उवाच ।
नमो देव्यै महादेव्यै सुरभ्यै च नमो नमः ।
गवां बीजस्वरूपायै नमस्ते जगदम्बिके ॥ २४॥

नमो राधाप्रियायै च पद्मांशायै नमो नमः ।
नमः कृष्णप्रियायै च गवां मात्रे नमो नमः ।
कल्पवृक्षस्वरूपायै प्रदात्र्यै सर्वसम्पदाम् ॥ २५॥

श्रीदायै धनदायै च बुद्धिदायै नमो नमः ।
शुभदायै प्रसन्नायै गोप्रदायै नमो नमः ॥ २६॥

यशोदायै सौख्यदायै धर्मज्ञायै नमो नमः ।

स्तोत्रश्रवणमात्रेण तुष्टा हृष्टा जगत्प्रसूः ॥ २७॥

इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे सप्तचत्वारिंशाध्यायान्तर्गतं महेन्द्रकृतं सुरभीस्तोत्रं समाप्तम् ।

ब्रह्मवैवर्तपुराण । प्रकृतिखण्ड । अध्याय ४७/१७-१९, २४-२७॥

brahmavaivartapurANa . prakRRitikhaNDa . adhyAya 47/17-19, 24-27..

Proofread by PSA Easwaran

---

*Mahendrakritam Surabhi Stotram*

pdf was typeset on March 5, 2025

Please send corrections to *sanskrit@cheerful.com*